# Ashtaprasapushpanjalih

# અષ્ટપ્રાસપુષ્પાઞ્જલિઃ

## Document Information

Text title : Ashtaprasapushpanjalih

File name : aShTaprAsapuShpAnjaliH.itx

Category : vishhnu

Location : doc_vishhnu

Author : shrIsundaradAsa

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2023

*sanskritdocuments.org*

# અષ્ટપ્રાસપુષ્પાઞ્જલિઃ

ત્રાતા યો જગતાં સકૃત્પ્રપદનપ્રીતાન્તરાત્મા મુહુ-
દાર્તાભૂદભયસ્ય ચેતિ જગતિ ખ્યાતાપદાનાવલિઃ ।
નૈતાદૃક્ કરુણાકરોઽન્ય ઇતિ નિર્ધૂતાન્યદેવઃ સદા
સીતાનાયકમેવ તં મમ મનો જાતાદરં સેવતે ॥ ૧॥

જેતા નૂતનનીલનીરદરુચાં ભ્રાતા ચ નીલોત્પલ-
વ્રાતાભાવિતતેઃ સખા હરિમણીજાતાઞ્જનૌષત્વિષામ્ ।
સીતાપાઙ્ગમરીચિવીચિનિચયસ્ફીતાત્મરૂપઃ શ્રિતા-
નેતાન્ નઃ પરિપાત્વસૌ રઘુપતેઃ પૂતાકૃતેનલિમા ॥ ૨॥

યે તાવદ્ બહુદુઃખસાગરગતા ભીતા જનાઃ સંસૃતૌ
યાતાયાતનિતાન્તતાન્તહૃદયા નીતાશ્ચ નીચાં દશામ્ ।
એતાદૃક્ષ્વપિ દુર્દશાસુ મનસા સીતાપતિં યાન્તિ ચેદ્
યાતાયાતપરિશ્રમં જહતિ તે કા તાવતા સ્યાત્ ક્ષતિઃ ॥ ૩॥

માતારો ન હિ યન્મહિમ્ન ઇહ વિખ્યાતા મહાન્તોઽપ્યસા-
વેતાવાનિતિ યોગિનોઽપિ સતતં ધ્યાતાત્મરૂપા અપિ ।
સીતાનાથમહિમ્નિ તત્ર કિમનાઘ્રાતાત્મદૃષ્ટિક્રમો
જ્ઞાતાભૂવમિહેદૃશોઽહમધુના સ્તોતા ભવેયં કથમ્ ॥ ૪॥

નેતાદિત્યકુલસ્ય સન્નપિ જનાન્ ક્રીતાન્ સ્વકીયૈર્ગુણૈઃ
શીતાલોકમૃદૂક્તિભિશ્ચ સુખયન્ માતાપિતૃભ્યોઽધિકમ્ ।
ધૌતાન્ કાર્તયુગાંશ્ચ ધર્મનિવહાંસ્ત્રેતાયુગેઽપ્યાચરન્
વ્યાતાનીદ્રતિસાધુ રાજ્યમિહ યઃ સીતાપતિઃ પાતુ સઃ ॥ ૫॥

લોકા યૂયમુપાશ્રયધ્વમધુના લોકાભિરામં કૃપા-
લોકાસારકૃતાવનં રઘુપતિં લોકાતિશાયિપ્રભુમ્ ।
લોકાલોકધરાવધીહ ગમને લોકાન્તરોદ્ધાવને-
ઽપ્યેકાપીતરદેવતા ન શરણં કાકાસુરસ્યાપ્યભૂત્ ॥ ૬॥

મૂકાત્માપ્યહમાશ્રયે રઘુપતિં નાકાધિપાદ્યૈર્નુતં
રાકાચન્દ્રનિભાનનં સ્તુતિકૃતે લોકાન્ વિધાતું મુદા ।
કાકારાવસમાસ્તદન્યવિષયશ્લોકા ઇતિ જ્ઞાનવા-
ઞ્શોકાનામપનોદનાય જગતામેકાધિપં સન્તતમ્ ॥ ૭॥

શૈલાનામપિ યસ્ય પાદરજસા ચેલાદિભૂષામણી-
જાલાનિ સ્ફુટમમ્બુજાદિસુમનોમાલાશ્ચ સમ્પાદિતાઃ ।
સા લાવણ્યમયી તનુસ્તનુમતાં હેલાદિયોગ્યા ચ તં
ફાલાક્ષાદિનુતં શ્રયે રઘુવરં શીલાન્વિતં સર્વદા ॥ ૮॥

આદાયાશુ કરેણ શૈલનિવહાન્ વ્યાદાય વક્ત્રં ચ યા
ખાદાય દ્રુતમાપતન્ત્યભિમુખં ખેદાવહા પ્રાણિનામ્ ।
સીદામીતિ હતાપતદ્ યદિષુણા સા દારુણા તાટકા
મોદાઢ્યા મુનયોઽસ્તુવન્ તમનઘં વેદાન્તવેદ્યં ભજે ॥ ૯॥

મારીચો હિ યદીયબાણવિભવે વૈરીભવન્નાદિમો
દૂરીકૃત્ય નિપાતને નિપુણતામૂરીચકારાદ્ભુતામ્ ।
દારીયસ્તનદારણઃ સુદુરહઙ્કારી કિલામોઘતાં
વારીણાં નિધિરર્ચિષાં ચ વિભવં ભૂરીડિતં તં ભજે ॥ ૧૦॥

સિદ્ધા યત્ર જના ભવન્તિ તપસા સિદ્ધાશ્રમં તં ભજ-
ઞ્શુદ્ધાત્મા રઘુનન્દનો ગુરુવચસ્તદ્ધારયંશ્ચેતસા ।
રુદ્ધાકાશમપાસ્ય રાક્ષસકુલં યુદ્ધાય પાતાસ્ત્રતઃ
શ્રદ્ધાતો ગુરુયજ્ઞરક્ષણપરો હૃદ્ધામ્નિ ભૂયાચ્ચિરમ્ ॥ ૧૧॥

શૂરાગ્રેસરમાનિનોઽત્ર ભુવિ યે ધીરાસ્તથા ભૂમિપા
ભારાદ્ યચ્ચલનાધિરોપણકથાદૂરા નિરાશા ગતાઃ ।
પૌરાણાં પુરતસ્તદીશ્વરધનુર્યો રાગતો લીલયા
સારાઢ્યોઽથ બિભેદ તં રઘુપતિં વીરાગ્રગણ્યં ભજે ॥ ૧૨॥

તારાનાથનિભાનનં જનકજા મારાભિરામાકૃતિં
સ્ફારાક્ષ્યુત્પલમાલિકાભિરભિતો નીરાજયન્તી મુહુઃ ।
સારાસારવિવેકલમ્પટમતિર્ધીરાથ વવ્રે પતિં
શ્રીરામં સુકુમારમૂર્તિરનિશં સ્મેરાનનં તં ભજે ॥ ૧૩॥

કારાગારમવાપિતાઃ ક્રતુભુજો યે રાવણેનાર્દિતા

નૈરાશ્યાન્નિજજીવનેઽપ્યશરણાઃ ક્ષીરામ્બુરાશેસ્તટે ।
દૂરાદચ્યુતમસ્તુવન્ જનકજાશ્રીરામચન્દ્રાવુભા-
વારાત્ તે કલયન્ત એવ મનસા ક્રૂરાશરેશં હતમ્ ॥ ૧૪॥

ક્ષીરાબ્ધેરવતીર્ય ચૈત્ય વિમલાકારાં પ્રસન્નાં સદા-
ચારાઢ્યાં તનુમુજ્જ્વલાં કુવલયં દૂરાદસૌ હર્ષયન્ ।
આરાધ્ય દ્વિજરાજભાવમમૃતાસારાભિવર્ષી નૃણાં
ઘોરાણીહ તમાંસ્યપોહ્ય જયતિ શ્રીરામચન્દ્રો ભુવિ ॥ ૧૫॥

યે ધાવન્ત્યપિ તાનહો ભુવિ મહીનાથાન્ સમસ્તાનપિ
ક્રોધાગ્નૌ હિ જુહાવ યો નિજપિતુર્બાધાપ્રવૃદ્ધાર્ચિષિ ।
આધાત્ તં જમદગ્નિજં મુનિમસૌ સાધારણં ચેતિ યદ્
ગાધાઃ સાધુ પઠન્તિ તં રઘુપતિં મેધાવિનં સંશ્રયે ॥ ૧૬॥

ત્યક્ત્વા રાજ્યમકણ્ટકં પિતૃકૃતે કૃત્વા નિવાસં વને
હત્વા ક્રૂરતરં વિરાધમસુરં ધૃત્વા જટાવલ્કલે ।
નત્વાગસ્ત્યમુખાનૃપીઞ્શુચિતમાન્ સત્ત્વાલયાન્ રાઘવઃ
સ્થિત્વા પઞ્ચવટીતટે સદયિતઃ સત્ત્વાશ્રયો નઃ પ્રભુઃ ॥ ૧૭॥

ભીમા શૂર્પણખાભિધા નિશિચરી કામાભિરામાકૃતૌ
રામાખ્યે પુરુષોત્તમે પતિમતિં કામાતુરા વ્યાતનોત્ ।
મા મા ત્વન્મતિરીદૃશી મદનુજં પ્રેમાસ્પદીકુર્વિતિ
ક્ષામા યેન નિષેધિતા ત્રિજગતીક્ષેમાવહં તં ભજે ॥ ૧૮॥

ધામાગત્ય નિશાચરી તદનુ સા રામાનુજં પ્રાપ્ય તદ્-
ભીમાસિપ્રતિકૃત્તકર્ણસુનસા ગામાશ્રિતાક્રન્દતી ।
યા માયાખરદૂષણત્રિશિરસોઽલીકાનિ સઙ્કીર્ત્ય સા
ગામાકાશમપિ સ્વનાન્મુખરયામાસાથ ઘોરસ્વરૈઃ ॥ ૧૯॥

બાણાનસ્યત એકદૈવ બહુલાન્ બાણાસનાદદ્ભુતં
પ્રાણાનપ્યથ રક્ષસાં ખરશિરઃસ્થૂણાસદૃક્ષાન્ ભુજાન્ ।
પાણાવામલકં વ યસ્ય દદૃશુર્વીણામુનીન્દ્રાદયઃ
શોણાભં પરિષસ્વજે જનકજા પ્રાણાધિપં તં નુમઃ ॥ ૨૦॥

પાયાન્મામિહ કોસલેશ્વરસુતાદાયાદ એષ જ્વલન્
માયારૂપમૃગસ્ય તૂર્ણમિષુણા કાયાદસૂન્ મોચયન્ ।
જાયાહર્તૃદશાનનસ્ય પદવીમાયાસતો જલ્પતઃ

પ્રેયાનાશુ દદૌ જટાયુષ ઉરુશ્રેયાંસિ યઃ સાનુજઃ ॥ ૨૧॥

ત્વં પાહીતિ વદત્કબન્ધમવટે તં પાતયિત્વા તતઃ
શમ્પાતુલ્યતનું ગતેન દનુજાસમ્પાદિતોપાયતઃ ।
પમ્પામેત્ય રઘૂદ્વહો હનુમતા સમ્પાદ્ય સખ્યં હરે-
સ્તં પાપં હનમૈક્ષત ત્રિજગતીકમ્પાવહં રાવણમ્ ॥ ૨૨॥

સાલાન્ સપ્ત ગિરીન્ રસાતલમસૌ કાલાનલાકારિણા
હેલાકૃષ્ટશરેણ કેનચિદહો નાલાનિવામ્ભોરુહામ્ ।
યોઽલાવીદ્ દ્રઢયન્ મનશ્ચ સુહૃદો ડોલાયિતં હર્ષયન્
નીલાધીનભુજં ભજે રઘુપતિં નીલામ્બુદશ્યામલમ્ ॥ ૨૩॥

કો યોદ્ધા ભુવને મયેતિ ચ ધિયા ભૂયોમદં વાલિનં
ન્યાયોપેતનિજાનુજત્યજનતજ્જાયોપભોગાદ્યઘૈઃ ।
હેયોઽસાવિતિ યોઽવધીત્ તમિષુણા માયોદ્ધતં ધાર્મિકં
ભૂયો ભૂય ઉપાસ્મહે તમનઘં શ્રેયોનિધિં રાઘવમ્ ॥ ૨૪॥

રાજા સર્વધનુષ્મતાં હનુમતા શ્રીજાનકીવૃત્તમ-
પ્યાજાનન્નખિલૈર્વૃતો વસુમતીભાજાં કપીનાં ગણૈઃ ।
વ્યાજાદ્ દારહૃદુત્થરોષશિખિનો ભાજાલદુષ્પ્રેક્ષણો
યો જાતો વિજયપ્રયાણસમયે શ્રીજાનિમેનં ભજે ॥ ૨૫॥

ઇન્ધાનોઽથ વનૌકસાં બહુબલૈર્મન્થાનભૂભૃત્સમૈઃ
પન્થાનં દ્યુસદાં નૃણાં ચ રઘુરાડિન્ધાનરૂપઃ શ્રિયા ।
સંવાયાથ વિભીષણેન જલધૌ બન્ધાય સેતોર્દૃઢં
સન્ધામેષ વિધાય ચ ત્રિદિવસં સિન્ધાવશેન સ્થલે ॥ ૨૬॥

બુદ્ધ્વા વારિનિધિં પ્રમત્તમધિકં ક્રુદ્ધ્વા શિતૈઃ સાયકૈ-
ર્દગ્ધ્વા તં રઘુરાડ્ વિશોષ્ય જલજં વધ્વા સહાક્રન્દયન્ ।
બદ્ધ્વા સેતુમસૌ વલીમુખબલૈરધ્વાનમાવૃત્ય ત-
ન્નિધ્વાનૈરપિ રોદસી રિપુપુરં રુદ્ધ્વા સુવેલે વ્યભાત્ ॥ ૨૭॥

કોટીભિશ્ચ વનૌકસાં સહ જવાદાટીકમાનઃ પ્રભુઃ
કોટીરં ચ સુવેલનામકગિરેઃ પાટીરગન્ધાન્વિતમ્ ।
ઘોટીદન્તિઘટાચ્છટારથભટૈશ્ચેટીજનૈઃ સંવૃતાં
વાટીભિશ્ચ મહીરુહામરિપુરીં પેટીમવૈત્ સમ્પદામ્ ॥ ૨૮॥

વેગાદાગતમીક્ષ્ય રાક્ષસબલં રાગાદ્ રણે રાઘવો
    નાગાશ્વાદિસમાકુલં હરિબલેષ્વાગાંસિ કુર્વન્ ભૃશમ્ ।
યો ગાઢં નિજઘાન સાયકવરૈશ્છાગાન્ યથા કેસરી
    રોગાણાં પ્રશમાય તં હરિમણીમાગાહમાનં ભજે ॥ ૨૯॥

યોગાસક્તહૃદો મુનીન્ સમવધીદ્ યાગાનુપઙ્ગાનપિ
    પ્રાગાક્રમ્ય હઠાદસાવસુપરિત્યાગાવધીતિ પ્રભુઃ ।
ભોગાશા ન ભવેદ્ યથાસ્ય ભુજગીભોગાભચાપચ્યુતૈ-
    ર્દ્રાગાગત્ય તથા શરૈરગમયદ્ વેગાત્ પુરીં રાવણમ્ ॥ ૩૦॥

ભીત્યા યસ્ય ન તેપિરે રવિકરા વાત્યાસ્તથા ચન્દ્રમાઃ
    શૈત્યાયાસ્ય ચ સૌધગસ્ય પુરતો ભીત્યાસ્તૃણીતે કરાન્ ।
પ્રીત્યાકૃત્ય શિરો મમાર્જ દયયા કાત્યાયનીવલ્લભો
    નીત્યાવર્જિત એષ રાઘવભયાદ્ દૈત્યાધિપ પ્રાદ્રવત્ ॥ ૩૧॥

નીચાનાં પ્રથમં નિતાન્તપરુષં સ્ત્રીચાપલેન ક્ષણાત્
    પ્રાચામપ્યયશોઽભિવધ્યમલિનં વાચામમેયાંહસા ।
આચારૈ રહિતં દશાનનમસૌ વાચાલયન્ ખેચરાન્
    આચાર્યાત્તશરૈર્જઘાન રઘુરાડ્ યે ચાનુગાસ્તૈઃ સહ ॥ ૩૨॥

લઙ્કારાજ્યપદે વિભીષણમમું શઙ્કાલવેનોત્થિતં
    સ્વં કારુણ્યમમોઘયન્ રઘુપતિઃ પઙ્કાતિગઃ સ્થાપયન્ ।
ટઙ્કગ્રૈરિવ પર્વતં બહુમદાહઙ્કારપૂર્ણં રિપું
    તં કાલાતિથિમાકલસ્ય ચ શરૈર્હુઙ્કારધૂતારમ્ ॥ ૩૩॥

દુષ્ટાનાં પ્રથમેન યેન રિપુણા કષ્ટાં દશાં પ્રાપિતા
    ભ્રષ્ટાસ્તે પદતો નિજાત્ સુરગણા અષ્ટાસુ દિક્ષુ દ્રુતાઃ ।
ધૃષ્ટાગ્ર્યેણ રઘૂદ્વહેન નિહતં હૃષ્ટાશયા વીક્ષ્ય તં
    હૃષ્ટા રામમવાકિરન્ સુમગણૈર્નષ્ટાપદઃ સ્વઃપુરાત્ ॥ ૩૪॥

વૃદ્ધાનાં સમુપાસિતા રઘુવરો બદ્ધાદરઃ સદ્વ્રતે
    ક્રુદ્ધાત્મેવ શુચૌ પ્રવેશ્ય દયિતાં શુદ્ધાં ગૃહીત્વા તતઃ ।
યદ્ધાત્રા કૃતમેષ પુષ્પકમદો નિર્ધાર્ય યાતું પુરં
    યુદ્ધાદાગતવાનરૈઃ સહ જવાન્દદ્ધા પ્રતસ્થે મુદા ॥ ૩૫॥

પ્રાસાદૈર્બહુભિર્વૃતાં હૃતરિપુર્યોઽસાવયોધ્યાપુરી
    પ્રાસાદ્યાખિલવાનરૈઃ સહ નૃપૈર્વ્યાસાદિતુલ્યૈર્દ્વિજૈઃ ।

શ્રીસામ્રાજ્યપદેઽભ્યપિચ્યત ભૃશં ભાસાર્કકોટ્યુજ્જ્વલો
    દાસાન્ પાતુ રઘૂદ્વહઃ સદયિતો હંસાવલોકાન્વિતઃ ॥ ૩૬॥

નાનાદેશસમાગતાન્ નરપતીન્ માનાતિગપ્રાભવા-
    ઞ્જ્ઞાનાબ્ધીનૃષિસત્તમાન્ કપિવરાન્ યાનાસનાલિઙ્ગનૈઃ ।
દીનાનાથજનાંસ્તથા ધનમણીદાનાદિભિર્માનય-
    ન્નેનાન્ નઃ પરિપાત્વસૌ રઘુપતિઃ સ્થાનાશ્રિતઃ સાનુગઃ ॥ ૩૭॥

શ્રીમાનેષ રઘૂદ્વહ સ્ત્રિજગતાં ક્ષેમાય પૂષાન્વયે
    ભૂમાવત્ર સતાં કૃતાવતરણઃ સીમાતિગપ્રાભવઃ ।
વામાક્ષીમણિજાનકીનિરવધિપ્રેમાર્દ્રવીક્ષાવશઃ
    સોમાદિત્યમુખામરૈરભિનુતો મામાદરાત્ ત્રાયતામ્ ॥ ૩૮॥

ઇતિ શ્રીસુન્દરદાસવિરચિતા અષ્ટપ્રાસપુષ્પાઞ્જલિઃ સમાપ્તા ।
સ્તોત્રસમુચ્ચયઃ ૨ (૫૧)

Proofread by Rajesh Thyagarajan

*Ashtaprasapushpanjalih*
pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*